# ‘श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – १** | **प्रश्नपत्रम् – ३** | **गुणाः – ५०** |
| **विषयः – धर्मशास्त्रम्** | **सत्रम् – २** | **समयः – २ तः ४** |
| **दिनाङ्कः – १५/०७/२०२१** | **सन्दर्भग्रन्थः – धर्मसिन्धुः (द्वितीयपरिच्छेदः नियतांशः)** | |

**सूचना -** **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १** **अधोलिखितेषु द्वयोः उत्तरं लिखत।**

१ श्रावणमासे चन्द्रवासरे किं कर्तव्यम् ? कथं च कर्तव्यम् ? व्याख्यायत।

२ यथाग्रन्थं उपाकर्मकालं परामर्शयत।

३ रक्षाबन्धनपर्व कदा ज्ञेयम् ? सप्रमाणं व्याख्यायत।

४ जन्माष्टमीव्रतं कदा ज्ञेयम् ? यथाग्रन्थं समयं व्याख्यायत।

**प्रश्नः २** श्रावणमासे कर्तव्यमुख्यकर्मणां निरूपणं कुरुत।

**प्रश्नः ३** भाद्रपदमासे कर्तव्यकर्मणां समासतो विवेचनं कुरुत।

**प्रश्नः ४** कन्यासङ्क्रान्तौ कः पुण्यकालः ज्ञेयः स्पष्टयत।

**प्रश्नः ५** आश्विनमासे देवीनवरात्रव्रतमहत्त्वं सविस्तृतं लिखत।

**प्रश्नः ६** **अधोलिखितेषु द्वयोः सविस्तृतमुत्तरं लिखत।**

१ आश्विनमासस्य मुख्यपर्वाणां समासतो व्याख्यानं कुरुत।

२ दुर्गासप्तशतीपाठविधानं कया रीत्या कर्तव्यम् ? व्याख्यायत।

३ शस्त्रादीनां पूजा कदा च कया रीत्या एवं कथं कर्तव्या ? स्पष्टयत।

४ तुलसीदलमहत्त्वं यथाग्रन्थं वर्णयत।

**प्रश्नः ७** सरस्वत्याः महत्त्वं विलिख्य पूजाविधानं स्पष्टयत।

**प्रश्नः ८** धर्मसिन्धुग्रन्थस्य वैशिष्ट्यं महत्त्वञ्च वर्णयत।

**प्रश्नः ९** यमद्वितीया कदा ज्ञेया ? इति विलिख्य तत्र कर्तव्यकर्मणां निरूपणं कुरुत ।

**प्रश्नः १०** चातुर्मासव्रतमहत्त्वं विलिख्य तत्र कालनिर्धारणं निदर्शयत ।

**प्रश्नः ११** **दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ धर्मसिन्धौ कति परिच्छेदाः सन्ति ?
२ जन्माष्टमीव्रतं कस्मिन् मासे ज्ञेयम् ?
३ सिंहसङ्क्रान्तिः कस्मिन् मासे ज्ञेया ?
४ आश्विनमासे का सङ्क्रान्तिः ज्ञेया ?
५ सूर्यसङ्क्रान्तयः कति सन्ति ?
६ अनन्तव्रतं कदा ज्ञेयम् ?
७ आश्विननवरात्रिः कदा ज्ञेया ?
८ सिन्धुशब्दस्य कोऽर्थः ?
९ धर्मशब्दस्य कोऽर्थः ?
१० मासाः कति सन्ति ?
११ कन्यासङ्क्रान्तौ कः मासः ज्ञेयः ?
१२ गणेशचतुर्थी कदा ज्ञेया ?
१३ दुर्गाष्टमी कदा ज्ञेया ?
१४ आश्विन-अमावास्यायां कस्य पूजनं कर्तव्यम् ?
१५ पुरुषार्थाः कति सन्ति ?

****